Digitized by Arya Samaj Foundation Chennai and eGangotri

820
११८VI(१)

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

गुरुकुल कांगड़ी विश्वविद्यालय, हरिद्वार
पुस्तकालय

विषय संख्या ४३०
पुस्तक संख्या ११८ V (१)
आगत पञ्जिका संख्या ४१,४८२

पुस्तक पर सर्व प्रकार की निशानियां लगाना वर्जित है। कृपया १५ दिन से अधिक समय तक पुस्तक अपने पास न रखें।

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

स्टाक प्रमाणीकरण १९८४-१९८५

COMPILED

430,118V(1)

41492

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

CHECKED 1975
Initial

अथ वेदाङ्गप्रकाशः

तत्रत्यः ।

पञ्चमो भागः ।

॥ सामासिकः ॥

LIBRARY GURUKULA KANGRI VIDYALAYA

॥ पाणिनिमुनिप्रणीतायामष्टाध्याय्यां ॥

चतुर्थो भागः ॥

श्रीमत्स्वामिदयानन्दसरस्वतीकृतव्याख्यासहितः ॥

पठनपाठनव्यवस्थायां सप्तमम्पुस्तकम्

अजमेरनगरे वैदिकयन्त्रालये

मुद्रितम् ॥

इस पुस्तक के छापने का अधिकार किसी को नहीं है ॥

क्योंकि

इस की रजिस्टरी कराई गई है ॥

—— :o✱o: ——

तृतीयवार १००० } संवत् १९६५ { मूल्य ।) डाकव्यय)॥

वैदिक यंत्रालय, अजमेर.

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

ऋते ज्ञानान्न मुक्तिः
पुस्तक सं० ...4630...
आगत सं० ...११८५...(६)
...४१,४८.२...
गुरुकुल ग्रन्थालय काँगड़ी.

विज्ञापन ॥

इस यन्त्रालय में सर्व प्रकार की संस्कृत, आर्य्यभाषा, अंग्रेज़ी उर्दू की छपाई उत्तम और सस्ती होती है. इस में अनेक प्रकार के बोम्बे तथा कलकत्ते के टाइप, बेल व चित्र प्रत्येक समय उपस्थित रहते हैं, इसमें महर्षि के ग्रन्थों के अतिरिक्त अन्य प्रत्येक प्रकार के ग्रन्थ भी छपते हैं, नक्शों का काम भी उत्तमतया होता है, सुप्रबन्ध के होने से सब बाहर की छपाई नियत समय पर निकालने का प्रयत्न किया जाता है. जिल्दसाजी का भी प्रबन्ध उत्तम है ।

प्रबन्धकर्त्ता

वैदिक यन्त्रालय, अजमेर ।

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

430,118V(1)
41492

॥ ओ३म् ॥

अथ सामासिकः ॥

अथ सामासिकः* प्रारभ्यते । तत्र समासाश्चत्वारः । प्रथमोऽव्ययीभावः । द्वितीयस्तत्पुरुषः । तृतीयो बहुव्रीहिः । चतुर्थश्च द्वन्द्वः ॥

समर्थः पदविधिः † । २ । १ । १ ॥

‡ समर्थपदयोरयं विधिशब्देन सर्वविभक्त्यन्तः समासः । समर्थस्य विधिः । समर्थविधिः । समर्थयोर्विधिः । समर्थविधिः । समर्थानां विधिः । समर्थविधिः । समर्थाद् विधिः । समर्थविधिः । समर्थे विधिः । समर्थविधिः । पदस्य विधिः । पदविधिः । पदयोर्विधिः । पदविधिः । पदानां विधिः । पदविधिः । पदाद् विधिः । पदविधिः । पदे विधिः । पदविधिः । समर्थविधिश्च समर्थविधिश्च समर्थविधिश्च समर्थविधिश्च समर्थविधयः । पदविधिश्च पदविधिश्च पदविधिश्च पदविधिश्च पदविधयः । समर्थविधयश्च पदविधयश्च । समर्थःपदविधिः । पूर्वः समास उत्तरपदलोपी याद्दच्छिकी च विभक्तिः । सामर्थ्यं द्विविधम् । एकार्थीभावः व्यपेक्षा च ॥

यह महाभाष्य का वचन है । जिस में भिन्न २ पदों का एकपद अनेक स्वरों का एकस्वर, अनेक विभक्तियों की एक विभक्ति हो जाती हैं उस को एकार्थीभाव और

---

* समासानां व्याख्यानो ग्रन्थः सामासिकः । जिस ग्रन्थ में समासों की व्याख्या हो उस का नाम सामासिक है ।

† यह सूत्र एक पद और अनेक पदों के सम्बन्ध में साधुत्व विधायक है ।

‡ जो यह आगे व्याख्या लिखी जाती है वह सब महाभाष्य की है ।

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

एकपद का अनेक पदों के साथ सम्बन्ध होने को व्यपेक्षा कहते हैं । सो प्रत्ययविधान में और पराङ्गवद्भाव में भी जाननी चाहिये । समास का प्रयोजन यह है कि अनेक पदों का एक पद अनेक विभक्तियों की एक विभक्ति और अनेक स्वरों का एक स्वर होना । "वृत्तिस्तर्हि कस्मान्न भवति महत्कष्टं श्रित इति । सविशेषणानां वृत्तिर्न वृत्तस्य वा विशेषणन्न प्रयुज्यत इति" यहां महत् शब्द विशेषण और कष्ट विशेष्य है । फिर विशेषण सहित जो कष्ट है सो श्रित के साथ समास को प्राप्त नहीं होता और जो समास भी कर लें तो भी कष्ट का श्रित के साथ विशेषण का योग नहीं हो सकता । यहां वृत्ति नाम समास का है । इस के उदाहरण तथा प्रत्युदाहरण इस सूत्र के आगे कहेंगे ॥

सुबामन्त्रिते पराङ्गवत् स्वरे ॥ २ । १ । २ ॥

जो आमन्त्रित पद परे हो तो पूर्व सुबन्त को पराङ्गवद्भाव स्वरविधि करने में होवे । अर्थात् आमन्त्रित पद का जो स्वर है वही पूर्व सुबन्त का स्वर हो जावे । संबोधन पद के परे सुबन्त पूर्व पद के स्थान में पराङ्गवत् अर्थात् संबोधन पद का जो स्वर है वही स्वर हो जाता है । कुण्डेनाटन् । परशुना वृश्चन् । मद्राणां राजन् । कश्मीराणां राजन् । मगधानां राजन् । सुबिति किम् । पीड्ये पीड्यमान । आमन्त्रित इति किम् । गेहे गार्ग्यः । परग्रहणं किम् । पूर्वस्य माभूत् । देवदत्तस्य कुण्डेनाटन् । स्वर इति किम् । कूपे सिञ्चन् । चर्मे नमन् ॥

वा०—षत्वणत्वे प्रति पराङ्गवन्न भवति । वा०-सुबन्तस्य पराङ्गवद्भावे समानाधिकरणस्योपसंख्यानमनन्तरत्वात् ॥

जैसे—तीक्ष्णया सूच्या सीव्यन् । तीक्ष्णेन परशुना वृश्चन् ॥

वा०—अव्ययानां प्रतिषेधो वक्तव्यः ॥

उच्चैरधीयान । नीचैरधीयान ॥

प्राक् कडारात् समासः ॥ २ । १ । ३ ॥

जो इस सूत्र से आगे (कडाराः कर्मधारये) यह सूत्र है वहां तक समास का अधिकार जानना योग्य है ॥

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

सह सुपा ॥ २ । १ । ४ ॥

सह ग्रहणं योगविभागार्थम् । सह सुप् समस्यते केन सह । समर्थेन । अनुव्यचलत् । अनुविशत् । ततः सुपा च सह सुप् समस्यते । उदाहरणम् । अजाकृपाणीयम् । पुनरुत्स्यूतम् । वासो देयं न पुनर्निष्कृतोरथः । अधिकारश्च लक्षणं च यस्य समासस्यान्यल्लक्षणं नास्ति इदं तस्य लक्षणं भविष्यति । ऐसा जानना कि जिसका लक्षण कोई सूत्र न होवे उस समास की सिद्धि करनेवाला यह सूत्र है । यहां से आगे तीन पद का अधिकार है । सो ये हैं :—सह । सुप् और पासु ॥

वा०-इवेन सह समासो विभक्त्यलोपः पूर्वपदप्रकृतिस्वरत्वञ्च वक्तव्यम् ॥

जैसे—वाससी इव । कन्ये इव ॥

अव्ययीभावः ॥ २ । १ । ५ ॥

यहां से आगे जो समास कहेंगे उस की अव्यय संज्ञा जानना चाहिये । पूर्वपदार्थप्रधानोऽव्ययीभावः । अव्ययीभावसमास में पूर्वपद का अर्थ प्रधान होता है ॥

अव्ययं विभक्तिसमीपसमृद्धिव्यृद्ध्यर्थाभावात्ययाऽसम्प्रतिशब्दप्रादुर्भावपश्चाद्यथाऽऽनुपूर्व्ययौगपद्यसादृश्यसंपत्तिसाकल्यान्तवचनेषु ॥ २ । १ । ६ ॥

विभक्ति से लेके अन्त शब्द पर्यन्त १६ (सोलह) अर्थ हैं उन में वर्त्तमान जो अव्यय हैं सो सुबन्त के साथ समास पावें वह अव्ययीभाव संज्ञक हों । "विभक्तिवचने तावत्" वचन शब्द का विभक्ति आदि सब के साथ योग जानना (विभक्ति) स्त्रीष्वधिकृत्य कथा प्रवर्त्तते । अधिस्त्रि * अधिकुमारि ।

ह्रस्वो नपुंसके प्रातिपदिकस्य ॥ १ । २ । ४७ ॥

जो नपुंसक लिङ्ग अर्थ में वर्त्तमान प्रातिपदिक हो तो उसके अच् को ह्रस्व हो । अतिरि कुलम् । अधिस्त्रि इत्यादि । नपुंसक इति किम् । ग्रामणीः । सेनानीः । प्रातिपदिकस्येति किमर्थम् । काण्डे तिष्ठतः । कुड्ये तिष्ठतः ॥

---

* "अव्ययीभावश्च" इस सूत्र से यहां नपुंसक लिङ्ग होता है । और "अव्ययादाप्सुपः" इस सूत्र से यहां सुप् का लुक् होता है ।

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

वा०—समीपवचने ॥

कुम्भस्य समीपम् । उपकुम्भम् । उपमणिकम् । उपशालम् ॥

नाव्ययीभावादतोऽम्त्वपञ्चम्याः ॥ २ । ४ । ८३ ॥

अदन्त अव्ययीभाव समास से सुप् का लुक् न हो किन्तु उस को अम् आदेश होजाय पञ्चमी को वर्ज्जके । जैसे—उपराजम् । अधिराजम् । अनश्चेति टच् । उपमणिकं तिष्ठति । उपमणिकं पश्य । उपकुम्भं पश्यति । अपञ्चम्या इति किम् । उपकुम्भादानय ॥

तृतीयासप्तम्योर्बहुलम् ॥ २ । ४ । ८४ ॥

अदन्त अव्ययीभाव से तृतीया और सप्तमी को अम् आदेश बहुल करके हो अर्थात् पक्ष में लुक् हो । जैसे—उपकुम्भं कृतम् । उपकुम्भेन कृतम् । उपकुम्भं निधेहि । उपकुम्भे निधेहि ॥ (समृद्धि) मद्राणां समृद्धिः सुमद्रम् । सुमगधं वर्त्तते । (व्यृद्धि) ऋद्धि का न होना "गवादिकानामृद्धेरभावः" दुर्गवदिकम् । दुर्यवनम् वर्त्तते (अर्थाभाव) वस्तु का अभाव । मक्षिकाणामभावो निर्मक्षिकम् । निर्मशकम् वर्त्तते (अत्ययः) नाशः । अतीतानि हिमानि यं समयं निर्हिमम् । निःशीतं वर्त्तते (असंप्रति) अर्थात् इस समय न हो । संप्रति तुन्नास्ति । अतिक्षुधम् । अतितैसृकम् (शब्दप्रादुर्भाव) शब्द का प्रकाश होना । रथानां पश्चात् अनुरथं पादातम् । योग्यता । वीप्सा । पदार्थानतिवृत्तिः । सादृश्यं चेति यथार्थाः । अनुरूपं । यह रूप के योग्य है । अर्थमर्थम्प्रतीति प्रत्यर्थम् । पदार्थानतिवृत्तिः । यथाशक्ति । यथाबलमित्यादि (आनुपूर्व्यम्) अनुक्रमम् । अनुज्येष्ठं प्रविशन्तु भवन्तः (यौगपद्य) एककालं सचक्रं धहि युगपच्चक्रं धेहीत्यर्थः (सादृश्य) नाम समान । काले समानम् । सदृशः सख्याः । ससखि (संपत्तिः) अर्थात् अच्छे प्रकार प्राप्ति । ब्रह्मणः संपत्तिः सब्रह्म । सधनम् देवदत्तस्य (साकल्य) नाम सब । तुषेण सह भुङ्क्ते सतुषम् । सबुसम् (अन्तवचन)

ग्रन्थान्ताधिके च । ६ । ३ । ७६ ॥

जो ग्रन्थ उत्तर पद परे हो तो ग्रन्थान्त में तथा अधिक अर्थ में वर्त्तमान जो सह शब्द है उस को स आदेश हो । सज्योतिषमधीते । समुहूर्तम् । ससंग्रहं व्याकरणमधीते । अधिके । सद्रोणा खारी । समाषः कार्षापणः ॥

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

अथ सामासिकभूमिका ॥

समास उसे कहते हैं कि जिस में अनेक पदों को एकपद में जोड़ देना होता है। जब अनेक पद मिल के एक पद हो जाता है तब एक पद और एक स्वर होते हैं, पर समास विद्या के जाने विना कुछ विदित नहीं हो सकता। इसलिये समास विद्या अवश्य जाननी चाहिये ॥

समास चार प्रकार का होता है ॥

एक अव्ययीभाव, दूसरा तत्पुरुष, तीसरा बहुव्रीहि और चौथा द्वन्द्व। अव्ययीभाव में पूर्वपदार्थ, तत्पुरुष में उत्तरपदार्थ, बहुव्रीहि में अन्य पदार्थ और द्वन्द्व में उभय अर्थात् सब पदों के अर्थ प्रधान रहते हैं। जिसका अर्थ मुख्य हो वही प्रधान कहाता है।

अव्ययीभाव के दो भेद होते हैं ॥

एक पूर्वपदाव्ययीभाव दूसरा उत्तरपदाव्ययीभाव ॥

तत्पुरुष नव प्रकार का होता है ॥

द्वितीया तत्पुरुष। तृतीया तत्पुरुष। चतुर्थी त०। पञ्चमी त०। षष्ठी त०। सप्तमी त०। द्विगु नञ् और कर्मधारय ॥

बहुव्रीहि दो प्रकार का है ॥

एक तद्गुणसंविज्ञान दूसरा अतद्गुणसंविज्ञान ॥

द्वन्द्व भी तीन प्रकार का होता है ॥

एक इतरेतरयोग दूसरा समाहार और तीसरा एकशेष। इस प्रकार से ४ समासों के १६ (सोलह) भेद समझने योग्य हैं। और इन में से अव्ययीभाव, तत्पुरुष और बहुव्रीहि लुक् और अलुक् भेद से दो २ प्रकार के होते हैं। इन के उदाहरण आगे

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

आवेंगे इन समासों को यथार्थ जानने से सर्वत्र मिले हुए पद पदार्थ और वाक्यार्थ जानने में अतिसुगमता होती है और समस्तपदयुक्त संस्कृत बोलना तथा दूसरे का कहा समझ भी सकता है यह भी व्याकरण विद्या की अवयव विद्या है जैसी कि संधि-विषय और नामिक विद्या लिख आये। यहां जो पठन पाठन के लिये एक उदाहरण वा प्रत्युदाहरण लिखा है इसे देख इसके समान अन्य उदाहरण वा प्रत्युदाहरण भी ऊपर से पढ़ने पढ़ाने चाहियें। इसके आगे प्रकृत जो कुछ लिखा जाता है वह सब (समर्थः पदविधिः) इस सूत्र के भाष्यस्थ वचन हैं। जिस को जानने की इच्छा हो वह उक्त सूत्र के महाभाष्य में देख लेवे (सापेक्षमसमर्थं भवतीति) जो एक पद के साथ अपेक्षा करके युक्त हो वह समर्थ होता है और जो अनेक पदों के साथ आकर्षित होता है वह प्रायः समास के योग्य नहीं होता। जो सापेक्ष असमर्थ होता है ऐसा कहा जावे तो राजपुरुषो दर्शनीयः। यहां वृत्ति प्रसक्त न होगी यह दोष नहीं, यहां प्रधान सापेक्ष है क्योंकि प्रधान सापेक्ष का भी समास होता है और जहां प्रधान सापेक्ष है वहां वृत्ति अर्थात् समास होगा। उदाहरणम्। देवदत्तस्य गुरुकुलम्। यह दोष नहीं। यहां षष्ठी समुदाय गुरुकुल की अपेक्षा करती है। जहां षष्ठी समुदाय की अपेक्षा नहीं करती वहां समास भी नहीं होता। किमोदनः शालीनाम्। यह कौन शाली अर्थात् चावलों का ओदन है ऐसे अर्थ में तण्डुलमात्र की अपेक्षा करके यह षष्ठी नहीं है। इसलिये यह समुदाय अपेक्षा नहीं। इत्यादिक स्थलों में समास नहीं होता। समास समर्थों का होता है। समर्थ किसको कहते हैं। पृथक् २ अर्थवाले पदों के एकार्थीभाव को। यहां अगले वाक्यों में पृथक् २ अर्थवाले पद हैं। जैसे—राज्ञः पुरुषः इस वाक्य में राज्ञः और पुरुषः ये दोनों पद अपने २ अर्थ के प्रतिपादन करने में समर्थ हैं। और समास होने से इनका एकार्थीभाव हो जाता है। यथा—राजपुरुष इत्यादि प्रयोगों में समासकृत क्या विशेष है। विभक्ति का लोप अव्यवधान यथेष्ट परस्पर सम्बन्ध एकस्वर एकपद और एकविभक्ति रहती है। एकार्थीभाव पक्ष में समर्थ पद का अर्थ—संगतार्थः समर्थः संसृष्टार्थः समर्थ इति। और जैसे संसृष्टार्थ है जैसे—संगतं घृतम् ऐसा कहने से मिला

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

हुआ विदित होता है । और जैसे संसृष्टोऽग्निरिति । ऐसा कहने से भी उक्तही अर्थ विदित होता है और जहां व्यपेक्षा सामर्थ्य होता है, वहां संप्रेक्षितार्थः समर्थः और संबद्धार्थः समर्थ इति यहां अनेक पदों का सम्बन्धमात्र प्रयोजन है इस व्यपेक्षा में अनेक पद अनेकस्वर अनेक विभक्ति वर्त्तमान रहती हैं ॥

वा०—स विशेषणानां वृत्तिर्न वृत्तस्य वा विशेषणं न प्रयुज्यत इति वक्तव्यम् ॥

अनेक विशेषण युक्त विशेष्य का समास और समस्त का विशेषण के साथ योग नहीं होता । सविशेषण जैसे ऋद्धस्य राज्ञः पुरुषः यहां राजा का विशेषण ऋद्ध होने से पुरुष के साथ राजन् शब्द का समास नहीं होता (वृत्त) राजपुरुषः इस समस्त राजन् शब्द के साथ ऋद्ध विशेषण का योग भी नहीं हो सकता * इसलिये समास विद्या को समझ लेना सब मनुष्यों को अत्यन्त उचित है ॥

इति भूमिका ॥

---

* अर्थात् वही असमर्थ होता है कि जिस का सम्बन्ध अनेक पदों के साथ हो जैसे राजन् शब्द का सम्बन्ध ऋद्ध और पुरुष के साथ होने से समास न हुआ वैसे सर्वत्र समझना चाहिये और जहां प्रधान की अपेक्षा हो वहां तो सविशेषण और वृत्त का भी विशेषण के साथ योग होता है जैसे देवदत्तस्य गुरुकुलम् यहां गुरु प्रधान है । इसलिये कुल के साथ समास और देवदत्त का सम्बन्ध भी हो गया ॥

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

अव्ययीभावे चाकाले ॥ ६ । ३ । ८२ ॥

अव्ययीभाव समास में कालवाची भिन्न उत्तरपद परे हो तो सह को स आदेश हो । सचक्रम् । सत्रुसम् । अकाल इति किम् । सह पूर्वाह्णम् । सभाष्यम् । साग्न्यधीते ॥

यथा सादृश्ये ॥ २ । १ । ७ ॥

जो सादृश्य भिन्न अर्थ में अव्यय सो सुबन्त के संग समास को प्राप्त हो सो समास अव्ययीभावसंज्ञक हो । यथा वृद्धं ब्राह्मणानामन्त्रयस्व । ये ये वृद्धाः यथावृद्धम् । यथाऽध्यापकम् । असादृश्य इति किम् । यथा देवदत्तस्तथा यज्ञदत्तः ॥

यावदवधारणे ॥ २ । १ । ८ ॥

जो अवधारण अर्थ में वर्त्तमान अव्यय सो सुबन्त के संग समास पावे । यावदमत्रं ब्राह्मणानामन्त्रयस्व । यावन्त्यमत्राणि संभवन्ति पञ्च षड् वा तावत आमन्त्रयस्व । अवधारण इति किम् । यावद्दत्तं तावद्भुक्तम् । नावधारयामि कियन्मया भुक्तमिति ॥

सुप्प्रतिना मात्रार्थे ॥ २ । १ । ९ ॥

मात्रा विन्दुः स्तोकमल्पमिति पर्यायाः । जो मात्रार्थ में वर्त्तमान प्रति उसके साथ सुबन्त समास पावे सो अव्ययीभावसंज्ञक हो । अस्त्यत्र किञ्चिच्छाकम् । शाकप्रति । सूपप्रति । ओदनप्रति । मात्रार्थ इति किम् । वृक्षं प्रति विद्योतते विद्युत् । सुबिति वर्त्तमाने पुनः सुब्ग्रहणमव्ययनिवृत्त्यर्थम् ॥

अक्षशलाकासंख्याः परिणा ॥ २ । १ । १० ॥

जो अक्ष शलाका और संख्यावाची शब्द एक, द्वि, त्रि इत्यादि परि के साथ समास को प्राप्त हों वह अव्ययीभावसंज्ञक समास है । अक्षेण परिक्रीडन्त इति अक्षपरि । शलाकापरि । एकपरि । द्विपरि । त्रिपरि ।

वा०—अक्षशलाकयोश्चैकवचनान्तयोरिति वक्तव्यम् ॥

इह माभूत् अक्षाभ्यां वृत्तमक्षैर्वृत्तम् ।

वा०—कितवव्यवहार इति वक्तव्यम् ॥

इह माभूत् । अक्षेणेदं न तथा वृत्तं शकटेन तथा पूर्वमिति ।

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

विभाषा ॥ २ । १ । ११ ॥

अधिकार । इसके आगे जो २ समास कहेंगे सो २ विभाषा करके होंगे अर्थात् पक्ष में विग्रह भी रहेगा जहां २ वि॰ ऐसा संकेत करें वहां २ विकल्प जानना ॥

अपपरिबहिरञ्चवः पञ्चम्या ॥ २ । १ । १२ ॥

जो अप, परि, बहिस् और अञ्चु का सुबन्त के साथ समास विकल्प करके होता है वह अव्ययीभाव कहाता है । जैसे वि॰ अपत्रिगर्त्तं वृष्टो देवः । अपत्रिगर्तेभ्यो वा । ग्रामाद्बहिर्बहिर्ग्रामम् । बहिर्ग्रामात् । बहिश्शब्दयोगे पञ्चमीभावस्यैतदेव ज्ञापकम् ॥

आङ्मर्यादाभिविध्योः ॥ २ । १ । १३ ॥

जो मर्यादा और अभिविधि अर्थ में आङ् पञ्चम्यन्त सुबन्त के सङ्ग वि॰ समास को प्राप्त होता है सो समास अव्ययीभावसंज्ञक होवे । आपाटलि पुत्रं वृष्टोदेवः । आपाटलि पुत्रात् । अभिविधि । आकुमारं यशः पाणिनेः । आकुमारेभ्यः ॥

लक्षणेनाभिप्रती आभिमुख्ये ॥ २ । १ । १४ ॥

जो आभिमुख्य अर्थ हो तो लक्षण अर्थात् चिह्नवाची सुबन्त के साथ अभि और प्रति वि॰ समास को प्राप्त हों वह अव्ययीभावसंज्ञक हो । जैसे—अभ्यग्नि शलभाः पतन्ति । अग्निमभि । प्रत्यग्नि । अग्निं प्रति । आभिमुख्ये किम् । देशं प्रति गतः ।

अनुर्यत्समया ॥ २ । १ । १५ ॥

समया नाम समीपता । जिस के समीप को अनु कहता हो उसी लक्षणवाची सुबन्त के साथ वि॰ समास पावे सो अव्ययीभावसंज्ञक हो । जैसे—अनुवनमशनिर्गतः । अनुवृक्षम् । अनुरिति किम् । वनं समया । यत्समयेति किम् । वृक्षमनुविद्योतते विद्युत् ।

यस्य चायामः ॥ २ । १ । १६ ॥

आयामो दैर्घ्यम् । जिस के लम्बेपन को अनु कहता हो उसी लक्षणवाची सुबन्त के सङ्ग वि॰ समास पावे सो अव्ययीभावसंज्ञक हो । अनुगङ्गं वाराणसी । अनुयमुनम्मथुरा । यमुनाऽऽयामेन मथुराऽऽयामो लक्ष्यते । आयाम इति किम् । वृक्षमनुविद्योतते विद्युत् ॥

तिष्ठद्गुप्रभृतीनि च ॥ २ । १ । १७ ॥

जो तिष्ठद्गु आदि शब्द निपातन किये हैं वे अव्ययीभावसंज्ञक हों । तिष्ठद्गु

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

कालविशेषः। जैसे—तिष्ठन्ति गावो यस्मिन् काले दोहनाय, स तिष्ठद्गु कालः। वहद्गु। आयतीगवम्।

वा०—खलेयवादीनि प्रथमान्तान्यन्यपदार्थे समस्यन्त इति वक्तव्यम्।

जैसे—खलेबुसम्। खलेयवम्। लूनयवम्। लूयमानयवम्। पूतयवम्। संहृतबुसम्। संह्रियमाणबुसम्। एते कालशब्दाः। समभूमि। समपदाति सुषमम्। विषमम्। निष्षमम्। दुष्षमम्। अपसमम्। प्राह्णम्। प्ररथम्। प्रमृगम्। प्रदक्षिणम्। अपरदक्षिणम्। संप्रति। असंप्रति। पापसमम्। पुण्यसमम्॥

वा०—इच् कर्मव्यतिहारे॥

दण्डादण्डि। मुसलामुसलि। नखानखि॥

पारे मध्ये षष्ठ्या वा॥ २। १। १८॥

जो पार और मध्य शब्द षष्ठ्यन्त सुबन्त के सङ्ग वि० समास पावें सो समास अव्ययीभावसंज्ञक हो। और एकारान्त निपातन भी किया है। जैसे—पारं गङ्गायाः। पारे गङ्गम्। मध्यं गङ्गायाः। मध्येगङ्गम्। षष्ठीसमास पक्ष। गङ्गापारम्। गङ्गामध्यम्। यहां फिर (वा) ग्रहण का प्रयोजन यह है कि पक्ष में षष्ठी समास हो के वाक्य भी रह जावे। जैसे गङ्गायाः पारम्। गङ्गाया मध्यम्॥

संख्या वंश्येन॥ २। १। १९॥

जो वंश्यवाची सुबन्त के साथ संख्यावाची सुबन्त वि० समास पावे सो अव्ययीभावसंज्ञक हो। जैसे—द्वौ मुनि व्याकरणस्य वंश्यौ। द्विमुनि व्याकरणस्य*। त्रिमुनि व्याकरणस्य †॥

नदीभिश्च॥ २। १। २०॥

जो संख्यावाची सुबन्त नदीवाची सुबन्तों के साथ समास को प्राप्त त्रि० होवें सो०। जैसे सप्तगङ्गम्। द्वियमुनम्। पञ्चनदम्। सप्तगोदावरम्॥

अव्ययीभावे शरत्प्रभृतिभ्यः॥ ५। ४। १०७॥

---

* दो मुनि अर्थात् पाणिनि और पतञ्जलि।

† तीन मुनि अर्थात् पाणिनि, पतञ्जलि और शाकटायन।

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

अव्ययीभाव समास में शरत आदि प्रातिपदिकों से टच् प्रत्यय होवे । जैसे:—
शरदः समीपम् उपशरदम् । प्रतिशरदम् । उपविपाशम् । प्रतिविपाशम् । अव्ययीभाव इति किम् । परमशरत् ॥

अनश्च ॥ ५ । ४ । १०८ ॥

अन् जिस के अन्त में हो उस सुबन्त से समासान्त टच् प्रत्यय हो । जैसे—राज्ञः समीपं । उपराजम् । आत्मनि अधि इति अध्यात्मम् । प्रत्यात्मम् ॥

नपुंसकादन्यतरस्याम् ॥ ५ । ४ । १०९ ॥

अन्नन्त नपुंसक सुबन्त से अव्ययीभाव समास में समासान्त टच् प्रत्यय वि० हो चर्म चर्म प्रति इति प्रतिचर्मम् । प्रतिचर्म । उपचर्मम् । उपचर्म ॥

नदीपौर्णमास्याग्रहायणीभ्यः ॥ ५ । ४ । ११० ॥

नदी, पौर्णमासी, आग्रहायणी ये तीन प्रातिपदिक जिनके अन्त में हों उन समस्त समुदायों से अव्ययीभाव समास में समासान्त टच् प्रत्यय वि० हो । जैसे—नद्याः समीपं । उपनदम् । उपनदि । उपपौर्णमासम् । उपपौर्णमासि । उपाग्रहायणम् । उपाग्रहायणि ।

झयः ॥ ५ । ४ । १११ ॥

झय् प्रत्याहार जिस के अन्त में हो उस सुबन्त से अव्ययीभाव समास में समासान्त टच् प्रत्यय वि० हो । जैसे—उपसमिधम् । उपसमित् । उपदृषदम् । उपदृषत् । अतिक्षुधम् । अतिक्षुत् ॥

गिरेश्च सेनकस्य ५ । ४ । ११२ ॥

सेनक आचार्य के मत में गिरि शब्दान्त प्रातिपदिक से अव्ययीभाव समास में समासान्त टच् प्रत्यय वि० हो । जैसे—अंतर्गिरम् । अन्तर्गिरि । उपगिरम् । उपगिरि । अव्ययीभाव समास में इतने समासान्त प्रत्यय होते हैं ॥

अन्यपदार्थे च संज्ञायाम् ॥ २ । १ । २१ ॥

जो संज्ञा हो तो अन्यपदार्थ में वर्तमान जो सुबन्त सो नदीवाची सुबन्त के साथ समास पावे । जैसे—उन्मत्तगङ्गं नाम देशः । लोहितगङ्गं नाम देशः । कृष्णगङ्गं नाम देशः । शनैर्गङ्गं नाम देशः । अन्यपदार्थ इति किम् । कृष्णवेणी । संज्ञायामिति किम् । शीघ्रगङ्गो देशः ॥ इत्यव्ययीभावः समासः समाप्तः ॥

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

अथ तत्पुरुषः ॥

तत्पुरुषः ॥ २ । १ । २२ ॥

यहां से लेके बहुव्रीहि समास से पूर्व २ तत्पुरुष समास का अधिकार है ॥

उत्तरपदार्थप्रधा नस्तत्पुरुषः ॥

तत्पुरुष समास में उत्तरपद का अर्थ प्रधान होता है ॥

द्विगुश्च ॥ २ ।१ । २३ ॥

द्विगु समास भी तत्पुरुष संज्ञक होता है "द्विगोस्तत्पुरुषत्व समासान्ताः प्रयोजनम्" ॥

समासान्ताः ॥ ५ । ४ । ६८ ॥

अब जो प्रत्यय कहेंगे वे समासान्त होंगे अर्थात् उन का समास के ही साथ ग्रहण किया जायगा । जैसे--पञ्चराजी । दशराजी । पञ्चराजम् । दशराजम् । द्व्यहः । त्र्यहः । पञ्चगवम् । दशगवम् ॥

गोरतद्धितलुकि ॥ ५ । ४ । ९२ ॥

तद्धितलुक् को वर्ज के गो शब्दान्त तत्पुरुष से समासान्त टच् प्रत्यय हो । जैसे—परमगवः। उत्तमगवः । पञ्चगवम् । दशगवम् । अतद्धितलुकीति किम् । पञ्चभिर्गोभिः क्रीतः । पञ्चगुः । दशगुः । तद्धितग्रहणेन ।किम् ।सुब्लुकि प्रतिषेधो माभूत् । जैसे—राजगवमिच्छति । राजगवीयति । लुग्ग्रहणात्किम् । तद्धित एव माभूत् । पञ्चभ्यो गोभ्य आगतं पञ्चगवरूप्यम् । पञ्चगवमयम् ॥

ऋक्पूरब्धूः पथामानक्षे ॥ ५ । ४ । ७४ ॥

जो अक्ष सम्बन्धी अर्थ न हो तो ऋक्, पुर्, अप्, धुर्, और पथिन् ये जिन के अन्त में हों उन प्रातिपदिकों से समासान्त अकार प्रत्यय हो । जैसे—अविद्यमाना ऋक् यस्मिन्सोऽनृचो ब्राह्मणः । बह्वृचः । ब्राह्मणपुरम् । नान्दीपुरम् । द्विर्गता आपो यस्मिन् तद् द्वीपम् । अन्तरीपम् । समीपम् । राज्ञान्धूः । राजधुरा । महापुरा । देवपथः । जलपथः । अनक्ष इति किम् । अक्षस्य धूः । अक्षधूः । दृढधूरक्षः ॥

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

अच् प्रत्यन्ववपूर्वात् सामलोम्नः ॥ ५ । ४ । ७५ ॥

जो प्रति, अनु और अव पूर्वक सामन् और लोमन् प्रातिपदिक हों तो उन से समासान्त अच् प्रत्यय हो। प्रतिसामम्। अनुसामम्। अवसामम्। प्रतिलोमम् अनुलोमम्। अवलोमम् ॥

अक्ष्णोऽदर्शनात् ॥ ५ । ४ । ७६ ॥

दर्शन भिन्न अर्थ में अक्षि शब्द से समासान्त अच् प्रत्यय हो। जैसे—पुष्कराक्षम्। उदुम्बराक्षः। अदर्शनादिति किम्। ब्राह्मणाक्षि ॥

ब्रह्महस्तिभ्यां वर्चसः ॥ ५ । ४ । ७८ ॥

ब्रह्मन् और हस्तिन् शब्द से परे जो वर्चस् उस से समासान्त अच् प्रत्यय हो। जैसे—ब्रह्मणो वर्चः। ब्रह्मवर्चसम्। हस्तिनो वर्चः। हस्तिवर्चसम् ॥

वा०—पल्यराजभ्यां चेति वक्तव्यम् ॥

पल्लयवर्चसम्। राजवर्चसम् ॥

अवसमन्धेभ्यस्तमसः ॥ ५ । ४ । ७९ ॥

अव, सम् और अन्ध शब्द से परे जो तमस् उस से समासान्त अच् प्रत्यय हो। जैसे—अवगतं नाम प्राप्तं तमः। अवतमसम्। सम्यक्तमः। सन्तमसम्। अन्धन्तमः। अन्धतमसम्।

श्वसो वसीयः श्रेयसः ॥ ५ । ४ । ८० ॥

जो श्वस् शब्द से परे वसीयस् और श्रेयस् शब्द हों तो उन में समासान्त अच् प्रत्यय हों। श्वोवसीयसम्। श्वःश्रेयसम् ॥

अन्ववतप्ताद्रहसः ॥ ५ । ४ । ८१ ॥

अनुरहसम्। अवरहसम्। तप्तरहसम् ॥

प्रतेरुरसः सप्तमीस्थात् ॥ ५ । ४ । ८२ ॥

जो प्रति से परे सप्तमीस्थ उरस् उस से समासान्त अच् प्रत्यय हो, जैसे—उरसि प्रति। प्रत्युरसम्। सप्तमीस्थादिति किम्। प्रतिगतमुरः। प्रत्युरः ॥

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

अनुगवमायामे ॥ ५ । ४ । ८३ ॥

यहां आयाम अर्थ में अनुगव अच् प्रत्ययान्त निपातन किया है । गोरनु । अनुगवम् यानम् । आयाम इति किम् । गवां पश्चादनुगु ॥

द्विस्तावा त्रिस्तावा वेदिः ॥ ५ । ४ । ८४ ॥

जो वेदी के प्रमाण से अधिक द्विगुण वा त्रिगुण वेदी हो सो कहिये द्विस्तावा । त्रिस्तावा । ये वेदी के नाम हैं ॥

उपसर्गादध्वनः ॥ ५ । ४ । ८५ ॥

उपसर्ग से परे जो अध्वन् उससे समासान्त अच् प्रत्यय हो । जैसे—प्रगतोऽध्वानम् । प्राध्वोरथः । प्राध्वं शकटम् । निरध्वम् । प्रत्यध्वम् । उपसर्गादिति किम् । परमाध्वा । उत्तमाध्वा ॥

तत्पुरुषस्याङ्गुलेः संख्याव्ययादेः ॥ ५ । ४ । ८६ ॥

जो तत्पुरुष समास में अङ्गुलि शब्दान्त हो तो उससे समासान्त अच् प्रत्यय हो । संख्यादि जैसे—द्वे अङ्गुली प्रमाणमस्य तद्द्व्यङ्गुलम् । त्र्यङ्गुलम् । यहां तद्धितार्थ में समास और मात्रच् प्रत्यय का लोप जानना । अव्ययादि—निर्गतमङ्गुलिभ्यो निरङ्गुलम् । अत्यङ्गुलम् । तत्पुरुषस्येति किम् । पञ्चाङ्गुलिः । अत्यङ्गुलिः पुरुषः । (द्वन्द्वाच्चुदषहान्तात् समाहारे) इस सूत्र से पूर्व २ तत्पुरुष का अधिकार जानना ।

अहस्सर्वैकदेशसंख्यातपुण्याच्च रात्रेः ॥ ५ । ४ । ८७ ॥

अहन् सर्व एकदेश वाची संख्यात और पुण्य । चकार से संख्या और अव्यय इन से भी उत्तर जो रात्रि उससे समासान्त अच् प्रत्यय हो । अहर्ग्रहणं द्वन्द्वार्थं द्रष्टव्यम् । अहश्च रात्रिश्च । अहोरात्रः । एकदेशे पूर्वरात्रः । अपररात्रः । पूर्वापराधरेति समासः । संख्याता रात्रिः । संख्यातरात्रः । पुण्यारात्रिः । पुण्यरात्रः । द्वे रात्री समाहृते । द्विरात्रः ॥

अह्नोऽह्न एतेभ्यः ॥ ५ । ४ । ८८ ॥

(एतेभ्यः) अर्थात् संख्या अव्यय । और सर्व एकदेश इत्यादि शब्दों से परे जो अहन् उसको अह्न आदेश हो । संख्यायास्तावत् । जैसे—द्वयोरह्नोर्भवो द्व्यह्नः ।

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

त्र्यहः । अहरति क्रान्तः । अत्यह्नः । निरह्नः । सर्वं च तदहश्च । सर्वाह्णः । पूर्वञ्च तदहश्च । पूर्वाह्ण । अपराह्णः । संख्याताह्नः ।

न संख्यादेः समाहारे ॥ ५ । ४ । ८९ ॥

जो समाहार में वर्त्तमान और संख्यादि तत्पुरुष उससे परे अहन् शब्द को अह्न आदेश न हो । जैसे-द्वे अहनी समाहृते । द्व्यहः । त्र्यहः इत्यादि । समाहार इति किम् । द्वयोरन्होर्भव । द्व्यह्नः त्र्यह्नः । तद्धितार्थ इति समासे कृतेऽण आगतस्य द्विगोरिति लुक् ॥

उत्तमैकाभ्याञ्च ॥ ५ । ४ । ९० ॥

उत्तम अर्थात् पुण्य और एक इन से परे अहन् को अह्न आदेश न हो । जैसे—पुण्याहः । एकाहः ॥

राजाहस्सखिभ्यष्टच् ॥ ५ । ४ । ९१ ॥

राजन्, अहन् और सखि इन प्रातिपदिकों से परे समासान्त टच् प्रत्यय हो । जैसे— महाराजः । मद्रराजः । परमाहः । उत्तमाहः । देवसखः । राजसखः । ब्रह्मसखः ॥

अग्राख्यायामुरसः ॥ ५ । ४ । ९३ ॥

अग्राख्या अर्थ में उरस् शब्दान्त तत्पुरुष समास से टच् प्रत्यय हो । जैसे—अश्वानामुरः । अश्वोरसम् । हस्त्युरसम् । अग्राख्यायामिति किम् । देवदत्तस्योरः । देवदत्तोरः ॥

अनोऽश्मायस्सरसां जातिसंज्ञयोः ॥ ५ । ४ । ९४ ॥

जाति और संज्ञा के विषय में अनस्, अश्मन्, अयस् और सरस् शब्दान्त तत्पुरुष से समासान्त टच् प्रत्यय हो । जैसे—उपानसमिति जातिः । महानसमिति संज्ञा । अमृताश्ममिति जातिः । पिण्डाश्म इति संज्ञा । कालायसमिति जातिः । लोहितायसमिति संज्ञा । मण्डूकसरसमिति जातिः । जलसरसमिति संज्ञा । जातिसंज्ञयोरिति किम् । सदनः । सदश्मा । उत्तमायः । सत्सरः ॥

ग्रामकौटाभ्यां च तक्ष्णः ॥ ५ । ४ । ९५ ॥

ग्राम और कौट से उत्तर जो तक्षन् उससे टच् प्रत्यय हो । ग्रामस्य तक्षा । ग्रामतक्षः । कौटस्य तक्षाः । कौटतक्षः । ग्रामकौटाभ्यांचेति किम् । राज्ञस्तक्षा ॥

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

अतेः शुनः ॥ ५ । ४ । ९६ ॥

अति से उत्तर श्वन् तदन्त जो तत्पुरुष उससे समासान्त टच् प्रत्यय हो। जैसे—अतिक्रान्तः श्वानमतिश्वः । वराहो जववानित्यर्थः । अतिश्वः सेवकः । सुष्ठु स्वामिभक्त इत्यर्थः ॥

उपमानादप्राणिषु ॥ ५ । ४ । ९७ ॥

प्राणि भिन्न अर्थ में उपमान वाची श्वन् शब्द से टच् प्रत्यय हो। जैसे—आकर्षः श्वेव आकर्षश्वः । फलकश्वः । उपमितं व्याघ्रादिभिरिति समासः । उपमानादिति किम् । नश्वा । अश्वा । लोष्ठः । अप्राणिष्विति किम् । वानरः श्वेव वानरश्वा ॥

उत्तरमृगपूर्वाच्च सक्थ्नः ॥ ५ । ४ । ९८ ॥

उत्तर, मृग और पूर्व, चकार से उपमान पूर्वक जो सक्थिन् तदन्त तत्पुरुष से समासान्त टच् प्रत्यय हो। उत्तरसक्थम् । मृगसक्थम् । पूर्वसक्थम् । उपमान । फलकमिव सक्थि । फलकसक्थम् ॥

नावो द्विगोः ॥ ५ । ४ । ९९ ॥

नौ शब्दान्त द्विगु से समासान्त टच् प्रत्यय हो। द्वे नावौ समाहृते द्विनावम् । त्रिनावम् । द्वे नावौ धनमस्य द्विनावधनः । पञ्चनावप्रियः । द्वाभ्यान्नौभ्यामागतं द्विनावरूप्यम् । द्विनावमयम् । द्विगोरिति किम् । राजनौः । अतद्धितलुकीत्येव । पञ्चभिर्नौभिः क्रीतः । पञ्चनौः । दशनौः ॥

अर्द्धाच्च ॥ ५ । ४ । १०० ॥

जो अर्द्ध से परे नौ शब्द हो तो उस से समासान्त टच् प्रत्यय हो। अर्द्धं नावः अर्द्धनावम् ॥

खार्य्याः प्राचाम् ॥ ५ । ४ । १०१ ॥

प्राचीन आचार्य्यों के मत में अर्द्ध से उत्तर खारी शब्द और खारी शब्दान्त द्विगु इन से समासान्त टच् प्रत्यय हो। अर्द्धं खार्याः । अर्द्धखारम् । अर्द्धखारी । द्वे खार्य्यौ समाहृते । द्विखारम् । द्विखारि । त्रिखारम् । त्रिखारि ॥

द्वित्रिभ्यामञ्जलेः ॥ ५ । ४ । १०२ ॥

द्वि और त्रि शब्द से परे जो अञ्जलि उस से समासान्त टच् प्रत्यय हो। द्वाव-

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

ञ्जली समाहृतौ । द्व्यञ्जलम् । त्र्यञ्जलम् । द्विगोरित्येव । द्वयोरञ्जलिः । द्व्यञ्जलिः । अतद्धितलुकीत्येव । द्वाभ्यामञ्जलिभ्यां क्रीतः द्व्यञ्जलिः । त्र्यञ्जलिः । प्राचामित्येव । द्व्यञ्जलिप्रियः ॥

अनसन्तान्नपुंसकाच्छन्दसि ॥ ५ । ४ । १०३ ॥

नपुंसक लिङ्गवाची जो अनन्त और असन्त तत्पुरुष उस से समासान्त टच् प्रत्यय हो । वेद के विषय में । हस्तिचर्मे जुहोति । वृषभचर्मेऽभिषिञ्चति । असन्तात् । देवच्छन्दसानि । मनुष्यच्छन्दसानि । अनसन्तादिति किम् । बिल्वदारु जुहोति । नपुंसकादिति किम् । सुत्रामाणं पृथिवीं द्यामनेहसम् । अनसन्तान्नपुंसकाच्छन्दसि वा वचनम् । ब्रह्मसाम । देवच्छन्दः । ब्रह्मसामम् । देवच्छन्दसम् ॥

ब्रह्मणो जानपदाख्यायाम् ॥ ५ । ४ । १०४ ॥

ब्रह्मन् शब्दान्त तत्पुरुष से समासान्त टच् प्रत्यय हो जानपद की आख्या अर्थ में । सुराष्ट्रेषु ब्रह्मा । सुराष्ट्रब्रह्मः । अवन्तिब्रह्मः । पञ्चालब्रह्मः । जानपदाख्यायामिति किम् । देवब्रह्मा नारदः ॥

कुमहद्भ्यामन्यतरस्याम् ॥ ५ । ४ । १०५ ॥

कु और महत् से परे जो ब्रह्मन् शब्द सो अन्त में जिस के उस तत्पुरुष से समासान्त टच् प्रत्यय हो । कुब्रह्मः । कुब्रह्मा । महाब्रह्मः । महाब्रह्मा । ब्राह्मणपर्यायो ब्रह्मन् शब्दः ॥

द्वितीयाश्रितातीतपतितगतात्यस्त-प्राप्तापन्नैः ॥ २ । १ । २४ ॥

द्वितीयान्त समर्थ जो सुबन्त सो श्रित अतीत पतित गत अत्यस्त प्राप्त और आपन्न इन सुबन्तों के संग वि० समास पावे । सो समास तत्पुरुषसंज्ञक हो * कष्टं श्रितः । कष्टश्रितः । नरकश्रितः । कान्तारमतीतः । कान्तारातीतः । नरकं पतितः । नरकपतितः । ग्रामं गतः । ग्रामगतः । व्यसनमत्यस्तः । व्यसनात्यस्तः । सुखं प्राप्तः । सुखप्राप्तः । सुखमापन्नः । सुखापन्नः । समर्थग्रहणं किमर्थम् । पश्य देवदत्त कष्टं श्रितो विष्णुमित्रो गुरुकुलम् । यहां कष्ट शब्द का सम्बन्ध पश्य क्रिया के साथ है इसलिये समास नहीं होता ॥

---

* यहां से आगे द्वितीया तत्पुरुष समास चला ।

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

वा०-श्रितादिषु गमिगाम्यादीनामुपसङ्ख्यानम् ॥

ग्रामं गमी । ग्रामगमी । ग्रामं गामी । ग्रामगामी । ओदनं बुभुक्षुः । ओदनबुभुक्षुः ॥

स्वयं क्तेन ॥ २ । १ । २५ ॥

स्वयं सुबन्त क्तान्त सुबन्त के संग वि० जो समास हो सो समास तत्पुरुषसंज्ञक हो । जैसे—स्वयं धौतौ पादौ । स्वयं विलीनमाज्यम् । एकपद्यमैकस्वर्यं च समासत्वाद् भवति ॥

खट्वा क्षेपे ॥ २ । १ । २५ ॥

क्षेप नाम निंदा का है । द्वितीयान्त खट्वा सुबन्त, क्तान्त सुबन्त के संग वि० समास को प्राप्त हो सो समास तत्पुरुषसंज्ञक हो । जैसे—खट्वारोहणं चेह विमार्गप्रस्थानस्योपलक्षणम् सर्वएवायमविनीतः खट्वारूढ इत्युच्यते । खट्वारूढो जाल्मः । खट्वाप्लुतः । अपथप्रस्थित इत्यर्थः । क्षेप इति किम् । खट्वामारूढः ॥

सामि ॥ २ । १ । २७ ॥

यह सामि अव्यय अर्द्ध का पर्याय है । जैसे—सामिकृतम् । सामिपीतम् । सामिभुक्तम् ॥

कालाः ॥ २ । १ । २८ ॥

जो द्वितीयान्त कालवाची सुबन्त शब्द क्तान्त सुबन्त के साथ समास वि० पावे सो तत्पुरुषसंज्ञक हो । जैसे—षण्मुहूर्त्ताश्चराचराः । ते कदाचिदहर्गच्छन्ति । कदाचिद्रात्रिम् । अहरतिसृता मुहूर्त्ताः । अहस्संक्रान्ताः । रात्र्यतिसृता मुहूर्त्ताः । रात्रिसंक्रान्ताः । मासप्रमितश्चन्द्रमाः । मासं प्रमातुमारब्धः प्रतिपच्चन्द्रमा इत्यर्थः ॥

अत्यन्तसंयोगे च । २ । १ । २९ ॥

द्वितीयान्त कालवाची सुबन्त, सुबन्त के संग समास पावे अत्यन्त संयोग अर्थ में । अत्यन्त संयोग नाम सर्वसंयोग का है । जैसे—मुहूर्त्तं सुखम् । मुहूर्त्तसुखम् । सर्वरात्रकल्याणी । सर्वरात्रशोभना ॥

तृतीयातत्कृतार्थेन गुणवचनेन * । २ । १ । ३० ॥

जो तृतीयान्त सुबन्त (तत्कृतेन) अर्थात् तृतीयार्थकृतगुणवचन के साथ समास

* यहां से आगे तृतीया तत्पुरुष समास का आरम्भ जानो ॥

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

हो । तथा तृतीयान्त सुबन्त, अर्थ सुबन्त के संग भी समास हो सो तृतीया तत्पुरुष हो । उपादानेन विकलः उपादानविकलः । किरिणा काणः किरिकाणः । शङ्कुलया खण्डः शङ्कुलाखण्डः । धान्येनार्थः धान्यार्थः । तत्कृतेनेति किम् । अक्ष्णा काणः । गुणवचनेनेति किम् । गोभिर्वपावान् । समर्थग्रहणं किम् । त्वं तिष्ठ शंकुलया । खण्डो धावति मुसलेन ॥

पूर्वसदृशसमोनार्थकलहनिपुणमिश्रश्लक्ष्णैः ॥ २ । १ । ३१ ॥

तृतीयान्त सुबन्त का पूर्व सदृश सम ऊनार्थ कलह निपुण मिश्र और श्लक्ष्ण सुबन्तों के साथ समास हो सो तृतीया तत्पुरुष हो । जैसे—मासेन पूर्वः मासपूर्वः । संवत्सरपूर्वः । पित्रासदृशः पितृसदृशः । पित्रा समः पितृसमः । माषेणोनम् । माषोनम् । कार्षापणोनम् । मासविकलम् । कार्षापणविकलम् । असिकलहः । वाक्कलहः । वाग्निपुणः । शास्त्रनिपुणः । गुडामिश्रः । तिलामिश्रः । आचारश्लक्ष्णः ॥

वा०—पूर्वादिष्ववरस्योपसंख्यानम् ॥

मासेनावरः । मासावरः । संवत्सरावरः ॥

कर्तृकरणे कृता बहुलम् ॥ २ । १ । ३२ ॥

कर्त्ता और करण अर्थ में जो तृतीयान्त सुबन्त सो कृदन्त के साथ कहीं २ समास को प्राप्त होते हैं । वह तृतीया तत्पुरुष समास होता है । जैसे अहिना दष्टः । अहिदष्टः । देवदत्तेन कृतम् । देवदत्तकृतम् । नखैर्निर्भिन्नः । नखनिर्भिन्नः । कर्तृकरणे किम् । भिक्षाभिरुषितः । बहुलग्रहणं किम् । दात्रेण लूनवान् । परशुना छिन्न इह समासो न भवति । इह च भवति । पादहारको गलेचोपकः ॥

कृत्यैरधिकार्थवचने ॥ २ । १ । ३३ ॥

कर्त्ता और करणकारक में जो तृतीयान्त सो कृत्य प्रत्ययान्त सुबन्त के सङ्ग वि० समास को प्राप्त हो, अधिकार्थ वचन हो तो । स्तुति निन्दायुक्त वचन को अधिकार्थ वचन कहते हैं । वह तृतीया तत्पुरुष समास कहाता है । जैसे—कर्त्ता । काकपेया नदी । श्वलेह्यः कूपः । करण । वाष्पच्छेद्यानि तृणानि । घनाघात्यो गुणः । कषताड्यो दुष्टः । वा० कृत्यग्रहणे यण्ण्यतोर्ग्रहणम् । इह माभूत् । काकैः पातव्या इति ॥

अन्नेन व्यञ्जनम् ॥ २ । १ । ३४ ॥

जो तृतीयान्त व्यञ्जनवाची सुबन्त का अन्नवाची सुबन्त के साथ समास हो

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

सो तृतीया तत्पुरुष हो । जिस से अन्न का संस्कार किया जाय उस को व्यञ्जन कहते हैं । जैसे—दध्ना उपसिक्त ओदनः । दध्योदनः । क्षीरोदनः ॥

भक्ष्येण मिश्रीकरणम् ॥ २ । १ । ३५ ॥

मिश्रीकरण वाची तृतीयान्त सुबन्त भक्ष्यवाची सुबन्त के सङ्ग में वि० समास पावे सो तृतीया तत्पुरुष हो । जैसे—गुडेन मिश्रा धानाः । गुडधानाः । घृतेन मिश्रं शाकम् । घृतशाकम् ॥

ओजः सहोऽम्भस्तमसस्तृतीयायाः ॥ ६ । ३ । ३ ॥

जो तृतीयान्त ओजस्, अम्भस्, तमस् शब्दों से परे तृतीया का अलुक् हो । जो उत्तरपद परे हो तो । जैसे—ओजसा कृतम् । सहसा कृतम् । अम्भसा कृतम् । तमसा कृतम् ॥

वा०—पुंसानुजो जनुषान्धो विकृताक्ष इतिचोपसङ्ख्यानम् ॥

पुंसानुजः । जनुषान्धः । विकृताक्षः ॥

मनसः सञ्ज्ञायाम् ॥ ६ । ३ । ४ ॥

जो सञ्ज्ञा विषय में उत्तरपद परे हो तो तृतीयान्त मनस् से परे तृतीया का अलुक् हो । जैसे—मनसादत्ता । मनसागुप्ता । मनसारामः ॥

आज्ञायिनि च ॥ ६ । ३ । ५ ॥

जो आज्ञायिन् उत्तर पद परे हो तो तृतीयान्त मनस् से परे तृतीया का अलुक् हो । जैसे—मनसाज्ञायी ॥

आत्मनश्च पूरणे ॥ ६ । ३ । ६ ॥

आत्मनाषष्ठः । आत्मनापञ्चमः ॥

चतुर्थी तदर्थार्थबलिहितसुखरक्षितैः ॥ २ । १ । ३६ ॥

जो तदर्थ अर्थात् विकृतिवाची चतुर्थ्यन्त सुबन्त, अर्थ बलि हित सुख और रक्षित सुबन्तों के साथ समास को प्राप्त हो सो चतुर्थी तत्पुरुष कहावे * जैसे—यूपाय दारु यूपदारु । कुण्डलाय हिरण्यम् कुण्डलहिरण्यम् । इह न भवति । रन्धनाय स्थाली । अवहननायोलूखलमिति ॥

* यहां से चतुर्थी तत्पुरुष समास का आरम्भ समझना ॥

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

वा०—अर्थेन नित्यसमासवचनं सर्वलिङ्गता च वक्तव्या ॥

जैसे—ब्राह्मणार्थं पयः । ब्राह्मणार्था यवागूः । ब्राह्मणार्थः कम्बलः । कृमिभ्यो बलिः । कृमिबलिः । गोहितम् । मनुष्यहितम् । गोसुखम् । गोरक्षितम् । अश्वरक्षितम् ।

वैयाकरणाख्यायां चतुर्थ्याः ॥ ६ । ३ । ७ ॥

जो उत्तरपद परे हो तो वैयाकरणों की आख्या अर्थात् संज्ञा विषय में आत्मन् शब्द से परे चतुर्थी का अलुक् हो । आत्मनेभाषा । आत्मनेपदम् ॥

परस्य च ॥ ६ । ३ । ८ ॥

जो वैयाकरणों की आख्या अर्थ में उत्तरपद परे हो तो पर शब्द से परे चतुर्थी का अलुक् हो । जैसे परस्मैपदम् । परस्मैभाषा ॥

पञ्चमी भयेन ॥ २ । १ । ३७ ॥

जो पञ्चम्यन्त सुबन्त, भय सुबन्त के सङ्ग समास को प्राप्त हो सो पञ्चमी तत्पुरुष हो * जैसे—वृकेभ्यो भयम् । वृकभयम् । चोरभयम् । दस्युभयम् ॥

वा०—भयभीतभीतिभीभिरिति वक्तव्यम् ॥

जैसे—वृकेभ्यो भीतः वृकभीतः । वृकभीतिः, वृकभीः ॥

अपेतापोढमुक्तपतितापत्रस्तैरल्पशः ॥ २ । १ । ३८ ॥

जो पञ्चम्यन्त प्रातिपादिक, अपेत अपोढ मुक्त पतित और अपत्रस्त इन सुबन्तों के साथ समास होता है सो पञ्चमी तत्पुरुष हो । जैसे सुखादपेतः सुखापेतः । दुःखापेतः । कल्पनापोढः । कृच्छ्रान्मुक्तः । चक्रमुक्तः । वृक्षपतितः । नरकापत्रस्तः । अल्पशः अर्थात् पञ्चमी अल्पशः समास पावे । सब पञ्चमी नहीं । इस से प्रासादात् पतितः । भोजनादपत्रस्तः, इत्यादि में नहीं होता ॥

स्तोकान्तिकदूरार्थकृच्छ्राणि क्तेन ॥ २ । १ । ३९ ॥

जो स्तोक अन्तिक दूर और इनके तुल्य पञ्चम्यन्त हैं वे क्तान्त सुबन्त के साथ समास पावें सो पञ्चमी तत्पुरुष हो ॥

अलुगुत्तरपदे ॥ ६ । ३ । १ ॥

अलुक् और उत्तरपद इन दो पदों का अधिकार किया है ।

---

* यहां से पञ्चमी तत्पुरुष का आरम्भ है ॥

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

पञ्चम्याः स्तोकादिभ्यः । ६ । ३ । २ ॥

स्तोक आदि प्रतिपादकों से परे उत्तरपद हो तो पञ्चमी विभक्ति का लुक् न हो। जैसे—स्तोकान्मुक्तः । स्वल्पान्मुक्तः । अन्तिकादागतः । समीपादागतः । अभ्याशादागतः । दूरादागतः । विप्रकृष्टादागतः । कृच्छ्रान्मुक्तः । कृच्छ्राल्लब्धः । क्लेशान्मुक्तः ॥

वा०—शतसहस्रौ परणेति वक्तव्यम् ॥

शतात्परे परश्शताः । सहस्रात्परे परस्सहस्राः । राजदन्तादित्वात्परनिपातः । निपातनात् सुडागमः ॥

सप्तमी शौण्डैः ॥ २ । १ । ४० ॥

जो सप्तम्यन्त सुबन्त शौण्ड आदि सुबन्तों के साथ वि० समास को प्राप्त हो सो सप्तमी तत्पुरुष हो * जैसे—अक्षेषु शौण्डः अक्षशौण्डः । अक्षधूर्तः । अक्षकितवः ॥

सिद्धशुष्कपक्वबन्धैश्च ॥ २ । १ । ४१ ॥

जो सिद्ध, शुष्क, पक्व और बन्ध, सुबन्तों के सङ्ग सप्तम्यन्त सुबन्त का समास होता है । सो सप्तमी तत्पुरुष होता है । जैसे—सांकाश्यसिद्धः ग्रामसिद्धः । आतपशुष्कः । छायाशुष्कः । पयःपक्वः । तैलपक्वः । घृतपक्वः । स्थालीपक्वः । चक्रबन्धः । गृहबन्धः ॥

ध्वाङ्क्षेण क्षेपे ॥ २ । १ । ४२ ॥

वा०—ध्वाङ्क्षेणेत्यर्थग्रहणं कर्तव्यम् ॥

जो क्षेप अर्थात् निन्दा अर्थ में सप्तम्यन्त सुबन्त, ध्वाङ्क्षवाची सुबन्त के साथ समास पावे सो सप्तमी तत्पुरुष हो । जैसे—तीर्थेध्वांक्ष इव । तीर्थध्वाङ्क्षः । अनवस्थित इत्यर्थः । तीर्थकाकः । तीर्थवायसः । क्षेप इति किम् । तीर्थे ध्वाङ्क्षस्तिष्ठति ॥

कृत्यैर्ऋणे । २ । १ । ४३ ॥

ऋण अर्थ जाना जाय तो सप्तम्यन्त सुबन्त कृत्य प्रत्ययान्त के साथ समास पावे । मासे देयमृणम् । मासदेयम् । सम्वत्सरदेयम् । पूर्वाह्णे गेयं साम । प्रातरध्येयोऽनुवाकः । ऋण इति किम् । मासे देया भिक्षा ॥

---

* यहां से आगे सप्तमी तत्पुरुष का अधिकार चला है ॥

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

सञ्ज्ञायाम् । २ । १ । ४४ ॥

सञ्ज्ञा अर्थ में जो सप्तम्यन्त सुबन्त, सुबन्त के सङ्ग समास पावे सो सप्तमी तत्पुरुष समास होता है । जैसे—अरण्ये तिलकाः । अरण्ये माषाः । वने किंशुकाः । हलदन्तात्सप्तम्याः सञ्ज्ञायामित्यलुक् ॥

क्तेनाहोरात्रावयवाः । २ । १ । ४५ ॥

जो दिन और रात्रि के अवयववाची सप्तम्यन्त सुबन्त प्रातिपदिक, क्तान्तसुबन्त के साथ समास को प्राप्त हों सो सप्तमी तत्पुरुष समास हों । जैसे-पूर्वाह्णकृतम् । अपराह्णकृतम् । पूर्वरात्रकृतम् । पररात्रकृतम् । अवयवग्रहणं किम् । अहनि भुक्तम् । रात्रौकृतम् ।

तत्र ॥ २ । १ । ४६ ॥

जो तत्र सप्तम्यन्त सुबन्त, क्तान्त सुबन्त के साथ समास पावे सो सप्तमी तत्पुरुष हो । जैसे-तत्र भुक्तम् । तत्र पीतम् । तत्र मृतः ॥

क्षेपे ॥ २ । १ । ४७ ॥

जो क्षेप नाम निन्दा अर्थ में सप्तम्यन्त सुबन्त, क्तान्तसुबन्त के साथ समास पावे सो सप्तमी तत्पुरुष हो । अवतप्ते नकुलस्थितम् तवैतत् । उदके विशीर्णम् । प्रवाहे मूत्रितम् । भस्मनि हुतम् । निष्फले यत् क्रियते तदेवात्रोच्यते । तत्पुरुषे कृति बहुलमित्यलुक् ॥

पात्रे संमितादयश्च ॥ २ । १ । ४८ ॥

पात्रे संमित आदि शब्द निपातन किये हैं क्षेप अर्थ में, सो सप्तमी तत्पुरुष जानना । पात्रे संमिताः । पात्रे बहुलाः । उदरकृमिः । इत्यादि ॥

हलदन्तात्सप्तम्याः संज्ञायाम् ॥ ६ । २ । ९ ॥

हलन्त । और अदन्त प्रातिपदिक से परे सप्तमी का अलुक् हो जो संज्ञा विषय में उत्तर पद परे हो तो । जैसे—युधिष्ठिरः । त्वचिसारः । अदन्तात् । अरण्ये तिलकाः । अरण्ये माषकाः । वने किंशुकाः । वने हरिद्रकाः । वने बल्वजकाः । पूर्वाह्णे स्फोटकाः । कूपे पिशाचकाः । नद्यां कुक्कुटिकाः । नदी कुक्कुटिका । भूम्यां पाशाः । संज्ञायामिति किम् । अक्षशौण्डः ॥

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

वा०—हृद्द्युभ्यां ङेः ॥

जो उत्तर पद परे हो तो हृद् और दिव् से परे सप्तमी का अलुक् हो । जैसे—हृदिस्पृक् । दिविस्पृक् ॥

कारनाम्नि च प्राचां हलादौ ॥ ६ । ३ । १० ॥

कारनाम हलादि उत्तरपद परे हो तो प्राचीनों के मत में हलन्त और अदन्त से परे सप्तमी का अलुक् हो । जैसे—सूपेशाणः । मुकुटेकार्षापणम् । हले द्विपदिका । हले त्रिपदिका । कारनाम्नीति किम् । अभ्यर्हिते पशुः । प्राचामिति किम् । यूथे पशुः । यूथपशुः । हलादाविति किम् । अविकटे उरणः अविकटोरणः । हलदन्तादित्येव । नद्यां दोहनी नदीदोहनी ॥

मध्याद्गुरौ ॥ ६ । ३ । ११ ॥

मध्येगुरुः ॥

वा०—अन्ताच्चेति वक्तव्यम् ॥

अन्तेगुरुः ॥

अमूर्द्धमस्तकात्स्वाङ्गादकामे ॥ ६ । ३ । १२ ॥

जो कामवर्जित उत्तरपद परे हो तो मूर्द्ध और मस्तक भिन्न हलन्त और अदन्त से परे सप्तमी का अलुक् हो । जैसे—कण्ठे कालो यस्य सः कण्ठेकालः । उरसिलोमा । उदरेमणिः । अमूर्द्धमस्तकादिति किम् । मूर्द्धशिखः । मस्तकशिखः । अकाम इति किम् । मुखे कामो यस्य मुखकामः । स्वाङ्गादिति किम् । अक्षशौण्डः । हलदन्तादिति किम् । अङ्गुलित्राणः । जङ्घाबालिः ॥

बन्धे च विभाषा ॥ ६ । ३ । १३ ॥

जो घञन्त बन्ध उत्तरपद परे हो तो विकल्प करके हलन्त और अदन्त से परे सप्तमी का अलुक् हो । जैसे—हस्ते बन्धः हस्तबन्धः । चक्रे बन्धः चक्रबन्धः ॥

तत्पुरुषे कृति बहुलम् ॥ ६ । ३ । १४ ॥

तत्पुरुष समास में कृदन्त उत्तरपद परे हो तो सप्तमी का अलुक् बहुल करके हो । अर्थात् कहीं २ हो । स्तम्बेरमः । कर्णेजपः । नच भवति । कुरुचरः । मद्रचरः ॥

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

प्रावृट्शरत्कालदिवां जे ॥ ६ । ३ । १५ ॥

जो ज उत्तरपद परे हो तो प्रावृट्, शरत्, काल, दिव, इनसे परे सप्तमी का अलुक् हो। जैसे—प्रावृषिजः। शरदिजः। कालेजः। दिविजः ॥

विभाषा वर्षक्षरशरवरात् ॥ ६ । ३ । १६ ॥

इन शब्दों से परे वि० सप्तमी का अलुक् हो। वर्षेजः वर्षजः। क्षरेजः क्षरजः। वरेजः वरजः ॥

घकालतनेषु कालनाम्नः ॥ ६ । ३ । १७ ॥

जो * घ संज्ञक प्रत्यय, काल और तन प्रत्यय परे हों तो सप्तमी का अलुक् हो। जैसे—पूर्वाह्णेतरे। पूर्वाह्णेतमे। पूर्वाह्णतरे। पूर्वाह्णतमे। पूर्वाह्णे काले पूर्वाह्णकाले। पूर्वाह्णे तने पूर्वाह्णतने। कालनाम्न इति किम्। शुक्लतरे। शुक्लतमे। हलदन्तादिति किम्। रात्रितरायाम् ॥

शयवासवासिष्वकालात् ॥ ६ । ३ । १८ ॥

